# 209 (New Syllabus)

**II**

Total No. of Questions – 16

Total No. of Printed Pages - 4

Regd. No. | | | | | | | | | | |

## Part – II
## SANSKRIT, Paper - II
### (Second Language)

Time : 3 Hours] [Max. Marks : 100

Note : (1) All questions should be attempted.

(2) Question Nos. 1, 2 & 3 should be answered either in the medium of instructions of the candidate or in Sanskrit (Devanagari Script).

(3) The remaining questions should be answered in Sanskrit (Devanagari Script) only.

निर्देश : प्रथम, द्वितीय, तृतीय-प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्नाः संस्कृतभाषायामेव समाधातव्याः ।

1. एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत । 1 × 8 = 8

(अ) तक्षकस्य विषं दन्ते मक्षिकायास्तु मस्तके ।
वृश्चिकस्य विषं पुच्छे सर्वाङ्गे दुर्जने विषम् ।।

(आ) अर्थानामार्जनं कार्यं वर्धनं रक्षणं तथा ।
भक्ष्यमाणो निरादायः सुमेरुरपि हीयते ।।

2. एकं निबन्धप्रश्नं समाधत्त । 1 × 6 = 6

(अ) दिलीपस्य धर्मनिष्ठामधिकृत्य लिखत ।

(आ) गीर्वाणवाण्याः वैभवं लिखत ।

3. एकं निबन्धप्रश्नं समाधत्त । 1 × 6 = 6

(अ) विक्रमस्यौदार्यमिति पाठ्यभागस्य सारांशं लिखत ।

(आ) वेङ्कटरावस्य स्वभावं संग्रहेण लिखत ।

4. त्रयाणां प्रश्नानां समाधानानि लिखत । $3 \times 2 = 6$

(अ) कीदृशं वस्तु तथैव तिष्ठति ?

(आ) नृपश्रियः कीदृशाः ?

(इ) द्रोणद्रुपदयोः सम्बन्धः कीदृशः ?

(ई) केन द्रुपदः गर्वान्धः जातः ?

(उ) कालिदासः महाराजं कथं सन्तोषितवान् ?

(ऊ) भोजः कोशाध्यक्षं प्रति किं सूचितवान् ?

5. द्वयोः ससन्दर्भं व्याख्यानं लिखत । $2 \times 3 = 6$

(अ) अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ।

(आ) चित्रार्पितारम्भ इवाऽवतस्ते ।

(इ) विद्या यत्र परोपकारविभवाः सा ज्ञानभूमिर्मम ।

(ई) सा संस्कृताख्या सुकृतैकलभ्या ।

6. द्वयोः ससन्दर्भं व्याख्यानं लिखत । $2 \times 3 = 6$

(अ) निवृत्तरागस्य गृहं तपोवनम् ।

(आ) यः कृतमुपकारं विस्मरति स एव पुरुषाधमः ।

(इ) वैद्योऽपि मानव एव ।

(ई) राजा तं कनकाभिषेकेन सत्कृतवान् ।

7. त्रयाणां प्रश्नानां समाधानानि लिखत । $3 \times 2 = 6$

(अ) कदा प्रभृति अशुभानि निमित्तानि दृश्यन्ते ?

(आ) दिलीपेन सेव्यमानं नन्दिनी धेनुं कः चकर्ष ?

(इ) व्याधितस्य मित्रं किम् ?

(ई) देवः कुत्र सहायकृत् भवति ?

(उ) देवगिरीणां पञ्चनामानि लिखत ?

(ऊ) संस्कृताख्या वाणी कीदृशी ?

8. त्रयाणां प्रश्नानां समाधानानि लिखत । $3 \times 2 = 6$

(अ) हितोपदेशे कति भागाः सन्ति ? के च ते ?

(आ) ब्राह्मणः पुत्रप्राप्त्यर्थं कीदृशं व्रतमाचरितवान् ?

(इ) राजहंसः कः ? तस्य नगरी का ?

(ई) श्रीधरः स्व मातुः मरणसमये किं कुर्वन्नासीत् ?

(उ) मञ्जुहासिनी का ?

(ऊ) अप्पय्यदीक्षितः आन्ध्रभाषां कथं प्रशशंस ?

9. एकेन पदेन समाधानं लिखत । **5 × 1 = 5**

(अ) केषां बलानि अमेयानि ?

(आ) यावज्जीवं कः दहेत् ?

(इ) अनुष्ठानसमये मुनयोऽपि कीदृशाः भवन्ति ?

(ई) पापहरा नदी का ?

(उ) चित्रविंशतिः इति पाठ्यभागः कस्मात् स्वीकृतः ?

10. एकेन पदेन समाधानं लिखत । **5 × 1 = 5**

(अ) कौण्डिन्यस्य पुत्रः कः ?

(आ) विक्रमार्कचरितं केन वर्णितम् ?

(इ) राजहंसस्य पत्नी का ?

(ई) श्रीधरस्य ज्येष्ठभ्रातृवत् कः वर्धते ?

(उ) अप्पय्यदीक्षितः कस्य पुत्रः ?

11. अधोनिर्दिष्टकथां पठित्वा प्रश्नानां समाधानानि दत्त । **5 × 1 = 5**

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्पटीवृक्षः । तस्य कोटरे दैवदुर्विपाकात् गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद् वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित् किञ्चित् उद्धृत्य तस्मै ददति । तेन असौ जीवति । तेषां शावकरक्षां च करोति । अथ कदाचित् दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षयितुं तत्र आगतः । ततस्तम् आयान्तं दृष्ट्वा पक्षिशावकैः भयार्तैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेण उक्तम् – "कोऽयमायाति" ? इति । दीर्घकर्णो गृध्रमवलोक्य सभयमाह – "हा हतोऽस्मि । यतोऽयं मां व्यापादयिष्यति" इति ।

प्रश्नाः

(1) पर्पटीवृक्षः कुत्रास्ति ?

(2) वृक्षस्य कोटरे कः प्रतिवसति ?

(3) मार्जारः किमर्थं तत्र आगतः ?

(4) कोलाहलः कैः कृतः ?

(5) दीर्घकर्णः गृध्रमवलोक्य किमाह ?

12. नामनिर्देशपूर्वकं त्रीणि सन्धत्त । $3 \times 2 = 6$

(अ) जगद् + जननी

(आ) तत् + टीका

(इ) वाक् + ईशः

(ई) षट् + मुखः

(उ) शिवः + अहम्

(ऊ) पितुः + इच्छा

13. नामनिर्देशपूर्वकं त्रीणि विघटयत । $3 \times 2 = 6$

(अ) सज्जनः

(आ) उड्डयनम्

(इ) तदपि

(ई) जगन्नाथः

(उ) रामोऽपि

(ऊ) हरिर्गच्छति

14. द्वयोः शब्दयोः सविभक्तिरूपाणि लिखत । $2 \times 6 = 12$

(अ) भवत्

(आ) सम्पद्

(इ) मनस्

(ई) यद् (स्त्री)

15. समासनामनिर्देशपूर्वकं त्रयाणां विग्रहवाक्यानि लिखत । $3 \times 2 = 6$

(अ) व्याघ्रभीतः

(आ) लतातन्वी

(इ) त्रिभुवनम्

(ई) कंसकृष्णौ

(उ) यथाशक्ति

(ऊ) महाबलः

16. अधोनिर्दिष्टपट्टिकामाधारीकृत्य पञ्चसाधुवाक्यानि लिखत । $5 \times 1 = 5$

| | | |
|---|---|---|
| वयं | ग्रामं | गमिष्यन्ति |
| यूयं | समाधानं | करिष्यन्ति |
| ते | पाठं | पठिष्यामः |
| ताः | सत्यं | वदिष्यन्ति |
| देवाः | देवालयं | लेखिष्यथ |